भवः ठञ्। आनुमासिकः प्रतिमासभवे "पिण्डान्वाहार्य्यकं श्राद्धं कुर्य्यान्मासानुमासिकम्" इति मनुः।

**अनुमित** त्रि० अनु+मि—कर्म्मणि क्त। कृतानुमाने अनुमानविषयीभूते। "अनुमितोऽपि हि वाष्पनिरीक्षणाद् व्यभिचचार न तापकरोऽनल" इति नैष०।

**अनुमिति** स्त्री अनु—मा—क्तिन्। अनुमाने व्याप्तिविशिष्टस्य पक्षधर्म्मताज्ञानाधीने अनुभवभेदे "स पक्षस्तत्र वृत्तित्वज्ञानादनुमितिर्भवेदिति" भाषा०। अनुमितिश्च द्विविधा स्वार्था परार्था च तत्र हेतौ व्याप्तिनिश्चये सति तस्य च पक्षे वृत्तित्वज्ञानात् उपादेयपदार्थग्रहणाय प्रवर्त्तिका यानुमितिः सा स्वार्था। विवदमानं प्रति कञ्चित्पदार्थं साधयितुं मध्यस्थाद्यवलम्बनेन प्रतिज्ञाहेतूदाहरणोपनयननिगमनरूपपञ्चावयवन्यायसाध्या परार्था।

**अनुमित्सा** स्त्री अनु+मि—सन्—भावे अ। अनुमातुमिच्छायाम् सिषाधयिषायाम्। अनुमित्सायां हि सिद्धिसत्त्वेऽप्यनुमितिरुदेति तदभावे साध्यवत्तानिश्चयरूपसिद्धिसत्त्वे नानुमितिः। तत्रायं विशेषः सामाधिकरण्येन सिद्धिसत्त्वेऽपि अवच्छेदावच्छेदेनानुमितिर्भवत्येव न तत्रानुमित्सापेक्षा तथा च अवच्छेदावच्छेदेन सिद्धिरेव अवच्छेदावच्छेदेन सामानाधिकरण्येन चानुमितिं प्रतिबध्नाति एवञ्च तत्रैव इच्छापेक्षेति। अतएव वाचस्पतिना 'प्रत्यक्षपरिकल्पितमप्यर्थमनुमानेन बुभुत्सन्ते तर्करसिका" इत्युक्तम्।

**अनुमृत** त्रि० अनु पश्चात् शोकादिना मृतः। शोकादिना मृतस्य पश्चात् मृते। अनु+मृ—कर्म्मणि क्त। यस्य पश्चात् म्रियते तस्मिन् 'भवता नानुमृताऽपि लभ्यते" इति रघुः।

**अनुमेय** त्रि० अनुमीयतेऽसौ अनु+मि—कर्म्मणि यत्। अनुमित्यर्हे, अनुमातुं योग्ये 'एतावता नन्वनुमेयशोभीति" कुमा०। "फलानुमेयाः प्रारम्भाः संस्काराः प्राक्तना इव" इति रघुः।

**अनुमोद** पु० अनु+मुद—णिच्—घञ्। प्रकृतकर्म्मणि प्रवृत्तिविघाताकरणेनान्यप्रोत्साहानुकूलव्यापारे,। त्वया यत् कृतं तन्मेऽनुमतमित्याद्यभिलापव्यङ्ग्ये। भावे ल्युट्। तत्रैवार्थे न०।

**अनुमोदित** त्रि० अनु+मुद—णिच्—कर्म्मणि क्त। कृतानुमोदने स्वानुमतत्वज्ञापनेन प्रोत्साहिते "भवता यद्व्यवसितं तन्मेसाध्वनुमोदितम्। प्रार्थ्यमानोऽर्थिना यत्र हर्य्यो नैव विघातितः। दानकालेऽथवा तूष्णीं स्थितः, सोऽर्थोऽनुमोदित इति (प्रा०वि०) उक्तेऽर्थे च।

**अनुयव** अव्य० यवे विभक्त्यर्थे अव्ययी०। यवे इत्यर्थे। परिमुखा० भवादौ ञ्य। आनुयव्यम् तत्रभवे पदार्थे त्रि०।

**अनुयाज** पु० अनु+यज—घञ् यज्ञाङ्गत्वात् कुत्वाभावः। दर्शपौर्णमासाङ्गेषु प्रयाजादिषु पञ्चसु यागेषु। "यजतिषु ये यजामहे नानुयाजेषु" इति श्रुतिः। "प्रयाजान्मे अनुयाजांश्च केवलानिति" ऋ० १०,५१,६, अनुयाजानुमन्त्रणम् का० ३,५,१४।

**अनुयात** त्रि० अनु या—कर्त्तरि क्तः। पश्चाद्गन्तरि, सहगन्तरि च कर्म्मणि क्त यस्य पश्चाद्गम्यते तादृशे जने।

**अनुयात्र** अव्य० यात्रायां विभक्त्यर्थे पश्चादर्थे वा अव्ययी०। यात्रायामित्यर्थे, यात्रायाः पश्चाद्भावे च। अनुगता अनुरूपीकृता यात्रा येन प्रा०ब०। अनुयायिवर्गे। 'त्यक्तभोगस्य मे राजन्! वने वन्येन जीवतः। किं कार्य्यमनुयात्रेणेति" रामा० अनुगता यात्रा प्रा०स०। पश्चाद्यात्रायां स्त्री। तत्प्रयोजनमस्येत्यर्थे ठक्। आनुयात्रिकः अनुचरे सेवके त्रि०।

**अनुयात्रिक** त्रि० अनुयात्रा पश्चाद् यात्रा अनुगमनमस्त्यस्य ठन्। पश्चाद्गन्तरि अनुचरे "सर्व्वानेवानुयात्रिकवर्गान् त्वया सहेति" शकु०।

**अनुयायिन्** त्रि० अनुयाति पश्चात् गच्छति अनु+या—णिनि स्त्रियां ङीप्। पश्चाद्गन्तरि, सेवके, अनुचरे "न्यषेधि शेषोऽप्यनुयायिवर्गः" इति रघुः सदृशे, मुख्यस्यानुगन्तरि शिशौ च।

**अनुयुक्त** त्रि० अनु+युज—क्त। जिज्ञासिते पदार्थे। कृतप्रश्ने, यं प्रति कस्यचित् पदार्थस्य जिज्ञासार्थं प्रश्नः क्रियते तस्मिंश्च। "स चानुयुक्तो व्याचष्टामिति खण्डनखाद्यम्।

**अनुयुग** अव्य० युगे विभ० अव्ययी०। युग इत्यर्थे। तत्र भवः परिमुखा० ञ्य। आनुयुग्यः अनुयुगभवे त्रि०।

**अनुयूप** अव्य० यूपे विभ० अव्ययी०। "यूप इत्यर्थे। तत्र भवः परिमुखा० ञ्य। आनुयूप्यः यूपभवे त्रि०।

**अनुयोक्तृ** त्रि० अनु+युज—तृच् स्त्रियां ङीप्। प्रश्नकारके। मृतकाध्यापके च।

**अनुयोग** पु० अनुयुज्यते कथनाय नियुज्यते अनु+युज—घञ्। प्रश्ने। सति हि प्रश्ने, पृष्टः कथनाय प्रवर्त्तते। "निग्रहानुयोगे चेति" पा०। अनुपूर्व्वात् युजेः प्रश्नार्थकता। तेन "त्वया कियद्वेति तमन्वयुङ्क्त" इति रघौ प्रश्नार्थकतया निर्द्देशः।

**अनुयोगकृत्** पु० अनुयोगं प्रश्नविषयसंशयं कृन्तति कृत छेदने क्विप्। आचार्य्ये। कृ—क्विप्। पृच्छके त्रि०।